सर्वे प्रमाणादयोऽनधिगतमर्थं सामान्यतः प्रकारतो वाधिगमयन्ति, स्मृतिः पुनर्न पूर्वानुभवमर्य्यादामतिक्रामति तद्विषया तदूनविषया वा न तु तदधिकविषया सोऽयं वृत्त्यन्तराद्विशेषः स्मृतेरिति। विमृशति किंप्रत्ययस्येति ग्राह्यप्रवणत्वात् अनुभवस्य स्वानुभवात्तज्जः संस्कारो ग्राह्यमेव स्मारयतीति। प्रतिभासयति अनुभवमात्रजनितत्वाच्चानुभवमेवेति। विमृशन्नोपपद्यत इत्युभयस्वरूपमवधारयति ग्राह्यप्रवणतया ग्राह्योपरक्तः परमार्थतस्तु ग्राह्यग्रहणे एव उभयं तयोराकारं स्वरूपं निर्भासयति प्रकाशयति। स्वव्यञ्जकं कारणमञ्जनमाकारो यस्य स तथोक्तः। स्वकारणाकार इत्यर्थः। व्यञ्जकमुद्बोधकं तेनाञ्जनं फलाभिमुखीकरणं यस्येति वेत्यर्थः। ननु यदि कारणविचारेण बुद्धिस्मरणयोः सारूप्यं कस्तर्हि भेद इत्यत आह तत्र ग्रहणेति। ग्रहणमुपादानं न च गृहीतस्योपादानं सम्भवति तदनेनानधिगतबोधनं बुद्धेरित्युक्तं ग्रहणाकारो ग्रहणरूपं पूर्वं प्रधानं यस्याः सा तथोक्ता विकल्पितश्चायम् अभेदेऽपि गुणप्रधानभाव इति ग्राह्याकारः पूर्वः प्रथमो यस्याः सा तथोक्ता, इदमेव च ग्राह्याकारस्य ग्राह्यस्य पूर्वत्वं यद्वृत्त्यन्तरविषयीकृतत्वमर्थस्य तदनेन वृत्त्यन्तरविषयीकृतगोचरा स्मृतिरित्युक्तं भवति सोऽयमसम्प्रमोष इति। ननु अस्ति स्मृतेरपि सम्प्रमोषः दर्शयति हि पितृप्रादेरतीतस्य देशकालान्तरानुभूतस्याननुभूतचरदेशकालान्तरसम्बन्धं स्वप्न इत्यत आह सा च द्वयीति भावितः कल्पितः स्मर्त्तव्यो यया सा तथोक्ता। अभावितोऽकल्पितः पारमार्थिक इति यावत्। नेयं स्मृतिरपि तु विपर्य्ययस्तल्लक्षणोपपन्नत्वात् स्मृत्याभासतया तु स्मृतिरुक्ता प्रमाणाभासमिवेति भावः। कस्मात् पुनरन्ते स्मृतेरुपन्यास इत्यत आह। सर्वाः स्मृतय इति अनुभवप्राप्तिपूर्वा वृत्तिः स्मृतिस्ततः स्मृतीनामन्ते निवेश इत्यर्थः”।

धर्मशास्त्रशब्दे स्मृतिभेदादिकं ३८६३ पृ० दृश्यम्।

**स्मृतिहेतु** पु० ६त०। १संस्कारे वासनारूपे गुणभेदे जटा०।

**स्मेर** त्रि० स्मि-रन्। १विकशिते हेमच० २ईषद्धास्यान्विते च संक्षिप्त० “महाजनः स्मेरमुखो भविष्यति”कुमारः।

**स्यद** पु० स्यन्द-घञर्थे क। वेगे अमरः।

**स्यन्द** स्रवणे भ्वा० आ० लुङि, लृटि, लृङि च उभ० अक० ऊदित् वेट्। स्यन्दते स्यदित् अस्यदत् अस्यन्दिष्ट अस्यन्त। अधोपदेशत्वेऽपि विधिबलान्निष्यन्दते इत्यादौ षत्वम्।

**स्यन्द** पु० स्यन्द-भावे घञ्। द्रवद्रव्यक्षरणे प्रस्रवे।

**स्यन्दन** न० स्यन्द-भावे ल्युट्। १क्षरणे। “स्यन्दनञ्च सन्निकृष्टदेशस्य द्रवद्रव्यस्य च संयोगानुकूलो व्यापारः गमनत्वव्याप्यजातिभेदो वा “भ्रमणं रेचनं स्यन्दनोर्द्ध्वज्वलनमेव च। तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते” भाषा०। कर्त्तरि ल्यु। २जले न०। ३रथे मेदि०। ४तिनिसवृक्षे च पु० अमरः।

**स्यन्दनद्रुम** पु० कर्म०। तिनिशवृक्षे शब्दर०।

**स्यन्दनारोह** पु० स्यन्दनमारोहति युद्धार्थम्, आ+रुह अण्। रथारोहेण योद्धरि अमरः। [लालायां स्त्री अमरः।

**स्यन्दनि** पु० स्यन्द-अनि। तिनिशवृक्षे रत्नमा०। ङीप्।

**स्यन्दिन्** त्रि० स्यन्द+णिनि। १प्रस्रविणि। २लालायां स्त्री अमरः ङीप्।

**स्यन्न** त्रि० स्यन्द-क्त। स्रुते जलादौ अमरः।

**स्यन्नवीण** त्रि० स्यन्ना वीणा यत्र। स्रुते हेमच०।

**स्यम** ध्वनने भ्वा० पर० अक० सेट् क्त्वा वेट् फणादि०। स्यमति अस्यमीत् स्येमतु सस्यमतुः।

**स्यम** वितर्के चु० उ० सक० सेट्। स्यामयति ते असिस्यमत् त।

**स्यम** ध्याने अद० चु० उभ० सक० सेट्। स्यमयति असिस्यमत् त।

**स्यमन्तक** पु० स्यम-झच् संज्ञायां कन्। १श्रीकृष्णस्य हस्तस्थे मणिभेदे हेमच०। २वृक्षभेदे पु० मेदि०। ३सूर्य्यदत्ते सत्राजितो मणिभेदे तत्कथा भाग० १०५६ अ०। “आसीत् सत्राजितः सूर्य्योभक्तस्य परमः सखा। प्रीतस्तस्मै मणिं प्रादात् स च तुष्टः स्यमन्तकम्”इति। “दिने दिने स्वर्णभारानष्टौ स सृजति प्रभो!। दुर्भिक्षमार्य्यरिष्टानि सर्पाधिव्याधयोऽशुभाः। न सन्ति मायिनस्तत्र यत्रास्तेऽभ्यर्चितो मणिः” एतदुपाख्यानं स्यमन्तकोपाख्यानं तच्च सौरभाद्रचतुर्थीचन्द्रदर्शने श्राव्यम्” ति०त० रघु०।

**स्यमीका** स्त्री स्यम-ईकक्। १वल्मीके २काले ३मेघे च पु० ४नीलौषधौ स्त्री मेदि०।

**स्यूत** त्रि० सिव-कर्मणि क्त। १सूच्यादिना ग्रथिते वस्त्रादौ अमरः। सूत्ररचितपात्रे (थोकड़ी) पु० अमरः। पृषो० ऊत्। स्योतोऽप्यत्र भरतः।

**स्यूति** स्त्री सिव-भावे क्तिन्। सूच्यादिना वस्त्रादिसीवने।

**स्यून** पु० सिव-नक्। १सूर्य्ये २किरणे मेदि० ३सूच्यादिस्यूतखण्डवस्त्रनिर्मिते पदार्थे (धुकड़ी) च शब्दर०।

**स्यूम** न० सिव-मक्। १जले २किरणे संक्षिप्त०। किरणे पु० उणा०